# ArtatrANanArAyaNAShTAdashakam

# આર્તત્રાણનારાયણાષ્ટાદશકમ્

## Document Information

Text title : ArtatrANanArAyaNAShTAdashakam

File name : ArtatrANanArAyaNAShTAdashakam.itx

Category : dashaka, vishhnu, vishnu, aShTAdasha

Location : doc_vishhnu

Author : Traditional

Transliterated by : Nat Natarajan nat.natarajan at gmail.com

Proofread by : Nat Natarajan nat.natarajan at gmail.com, NA

Description-comments : From Brihatstotraratnakara with 408 stotras

Latest update : August 28, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 28, 2021

*sanskritdocuments.org*

# આર્તત્રાણનારાયણાષ્ટાદશકમ્

પ્રહ્લાદ પ્રભુરસ્તિ ચેત્તવ દૃરિઃ સર્વત્ર મે દર્શય
સ્તમ્ભે ચૈનમિતિ બ્રુવન્તમસુરં તત્રાવિરાસીદ્ધરિઃ ।
વક્ષસ્તસ્યવિદારયન્નિજનખૈર્વાત્સલ્યમાવેદયન્-
આર્તત્રાણપરાયણઃ સ ભગવાન્નારાયણો મે ગતિઃ ॥ ૧॥

શ્રીરામાવ વિભીષણોયમધુના ત્વાર્તો ભયાદાગતઃ
સુગ્રીવાનય પાલયેહમધુના પૌલસ્ત્વયેવાગતમ્ ।
એવં યોઽભયમસ્ય સર્વવિદિતં લઙ્કાધિપત્યન્દદા-
વાર્તત્રાણપરાયણઃ સ ભગવાન્નારાયણો મે ગતિઃ ॥ ૨॥

નક્રગ્રસ્તપદં સમુદ્યતકરં બ્રહ્મેશ દેવેશ માં
પાહીતિ પ્રચુરાર્તરાવકરિણં દેવેશ શક્તીશ ચ ।
મા શોચેતિ રરક્ષ નક્રવદનાચ્ચક્રશ્રિયા તત્ક્ષણાદ્-
આર્તત્રાણપરાયણઃ સ ભગવાન્નારાયણો મે ગતિઃ ॥ ૩॥

હા કૃષ્ણાચ્યુત હા કૃપાજલનિધે હા પાણ્ડવાનાં સખે
ક્વાસિ ક્વાસિ સુયોધનાદવગતાં હા રક્ષ માં દ્રૌપદીમ્ ।
ઇત્યુક્તોઽક્ષયમસ્ત્રરક્ષિતતનું યોઽરક્ષદાપદ્ગણાદ્-
આર્તત્રાણપરાયણઃ સ ભગવાન્નારાયણો મે ગતિઃ ॥ ૪॥

યત્પાદાબ્જનખોદકં ત્રિજગતાં પાપૌઘવિધ્વસનં
યન્નામામૃતપૂરણં ચ પિબતાં સન્તાપસંહારકમ્ ।
પાષાણશ્ચ યદઙ્ઘ્રિતો નિજવધૂરૂપં મુનેરાપ્તવાન્-
આર્તત્રાણપરાયણઃ  સ ભગવાન્નારાયણો મે ગતિઃ ॥ ૫॥

યન્નામ શ્રુતિમાત્રતોઽપરિમિતં સંસારવારાન્નિધિં
ત્યક્ત્વા ગચ્છતિ દુર્જનોઽપિ પરમં વિષ્ણોઃ પદં શાશ્વતમ્ ।
તન્નૈવાદ્ભુતકારણં ત્રિજગતાં નાથસ્ય દાસોસ્મ્યહમ્-
આર્તત્રાણપરાયણઃ ત્રાણપરાયણઃસ ભગવાન્નારાયણો મે ગતિઃ ॥ ૬॥

પિત્રા ભ્રાતરમુત્તમાઙ્ગમિતં ભક્તોત્તમં યો ધ્રુવં
દૃષ્ટ્વા તત્સમમારુરુક્ષુમુદિતં માત્રાઽવમાનં ગતમ્ ।
યોદાત્તં શરણાગતં તુ તપસા હેમાદ્રિસિંહાસનં
હ્યાર્તત્રાણપરાયણઃ સ ભગવાન્નારાયણો મે ગતિઃ ॥ ૭॥

નાથેતિ શ્રુતયો ન તત્ત્વમતયો ઘોષસ્થિતા ગોપિકા
જારિણ્યઃ કુલજાતિધર્મવિમુખા અધ્યાત્મભાવં યયુઃ ।
ભક્તિર્યસ્ય દદાતિ મુક્તિમતુલાં જારસ્ય યઃ સદ્ગતિ-
ર્હ્યાર્તત્રાણપરાયણઃ સ ભગવાન્નારાયણો મે ગતિઃ ॥ ૮॥

ક્ષુત્તૃષ્ણાર્તસહસ્રશિષ્યસહિતં દુર્વાસસં ક્ષોભિતં
દ્રૌપદ્યાભય ભક્તિયુક્તમનસા શાકં સ્વહસ્તાર્પિતમ્ ।
ભુક્ત્વાઽતર્પયદાત્મવૃત્તિમખિલામાવેદયન્ યઃ પુમાન્
આર્તત્રાણપરાયણઃ સ ભગવાન્નારાયણો મે ગતિઃ ॥ ૯॥

યેનારાક્ષિ રઘૂત્તમેન જલધેસ્તીરે દશાસ્યાનુજ-
સ્ત્વાયાતં શરણં રઘૂત્તમ વિભો રક્ષાતુર મામિતિ ।
પૌલસ્ત્યેન વિરાકૃતોઽથ સદસિ ભ્રાત્રા ચ લઙ્કાપુરે
હ્યાર્તત્રાણપરાયણઃ સ ભગવાન્નારાયણો મે ગતિઃ ॥ ૧૦॥

યેનાવાહિ મહાહવે વસુમતી સંવર્તકાલે મહા-
લીલાક્રોડવપુર્ધરેણ હરિણા નારાયણેન સ્વયમ્ ।
યઃપાપિદ્રુમસમ્પ્રવર્તમચિરાદ્ધત્ત્વા ચ યોગાત્ પ્રિયામ્-
આર્તત્રાણપરાયણઃ સ ભગવાન્નારાયણો મે ગતિઃ ॥ ૧૧॥

યોદ્ધાસૌ ભુવનત્રયે મધુપતિર્ભર્તા નરાણાં બલે
રાધાયા અકરોદ્રતે રતિમનઃપૂર્તિઃ સુરેન્દ્રાનુજઃ ।
યો વા રક્ષતિ દીનપાણ્ડુતનયાન્નાથેતિ ભીતિં ગતાન્-
આર્તત્રાણપરાયણઃ સ ભગવાન્નારાયણો મે ગતિઃ ॥ ૧૨॥

યઃસાન્દીપિનિદેશતશ્ચ તનયં લોકાન્તરાત્સન્નતં
ચાનીય પ્રતિપાદ્ય પુત્રમરણાદુજ્જૃમ્ભમાણાર્તયે ।
સન્તોષં જનયન્નમેયમહિમા પુત્રાર્થસમ્પાદનાદ્-
આર્તત્રાણપરાયણઃ સ ભગવાન્નારાયણો મે ગતિઃ ॥ ૧૩॥

યન્નામસ્મરણાદઘૌઘસહિતો વિપ્રઃ પુરાઽજામિલઃ

પ્રાણાન્મુક્તિમશેષિતામનુ ચ યઃ પાપૌઘદાવાતિયુક્ ।
સદ્યો ભાગવતોત્તમાત્મનિમતિં પ્રાપામ્બરીષાભિધ-
શ્ચાર્તત્રાણપરાયણઃ સ ભગવાન્નારાયણો મે ગતિઃ ॥ ૧૪॥

યોરક્ષદ્વસનાદિનિત્યરહિતં વિપ્રં કુચૈલાભિધં
દીનાસનચકોરપાલનપરઃ શ્રીશઙ્ખચક્રોજ્જ્વલઃ ।
તજ્જીર્ણામ્બરમુષ્ટિપાત્રપૃથુકાનાદાય ભુક્ત્વા ક્ષણાદ્-
આર્તત્રાણપરાયણઃ સ ભગવાન્નારાયણો મે ગતિઃ ॥ ૧૫॥

યત્કલ્યાણગુણાભિરામમમલં મન્ત્રાણિ સંશિક્ષતે
યત્સંશેતિપતિપ્રતિષ્ઠિતમિદં વિશ્વં વદત્યાગમઃ ।
યો યોગીન્દ્રમનઃસરોરુહતમઃપ્રધ્વંસવિદ્ભાનુમાન્-
આર્તત્રાણપરાયણઃ સ ભગવાન્નારાયણો મે ગતિઃ ॥ ૧૬॥

કાલિન્દીહૃદયાભિરામપુલિને પુણ્યે જગન્મઙ્ગલે
ચન્દ્રામ્ભોજવટે પુટે પરિસરે ધાત્રા સમારાધિતે ।
શ્રીરઙ્ગે ભુજગેન્દ્રભોગશયને શેતે સદા યઃ પુમાન્-
આર્તત્રાણપરાયણઃ સ ભગવાન્નારાયણો મે ગતિઃ ॥ ૧૭॥

વાત્સલ્યાદભયપ્રદાનસમયાદાર્તાર્તિનિર્વાપણાદ્-
ઔદાર્યાદઘશોષણાદગણિતશ્રેયઃ પદપ્રાપણાત્ ।
સેવ્યઃશ્રીપતિરેવસર્વજગતામેતે હિ તત્સાક્ષિણ-
પ્રહ્લાદશ્ચ વિભીષણશ્ચ કરિરાટ્ પાઞ્ચાલ્યહલ્યા ધ્રુવઃ ॥ ૧૮॥

ઇતિ શ્રીમચ્છઙ્કરાચાર્યવિરચિતમાર્તત્રાણપરાયણ-
નારાયણાષ્ટાદશકં સમ્પૂર્ણમ્ ॥

Proofread by Nat Natarajan, NA

*ArtatrANanArAyaNAShTAdashakam*
pdf was typeset on August 28, 2021

Please send corrections to *sanskrit@cheerful.com*